# MukhyaprAna Ashtakam

# મુખ્યપ્રાણાષ્ટકમ્

## Document Information

Text title : Mukhyaprana Ashtakam

File name : mukhyaprANAShTakam.itx

Category : vishhnu, vAdirAja, vishnu, aShTaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : May 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 26, 2024

*sanskritdocuments.org*

# મુખ્યપ્રાણાષ્ટકમ્

ભક્તિં શ્રીરમણસ્ય પાદયુગલે પ્રીત્યા પ્રદેહીશ
મચ્ચિતં તત્પાદપદ્મચિન્તનરતં નિત્યં વિધેહ્યચ્યુતમ્ ।
ત્વત્તાતં મયિ સુપ્રસન્નમધુના વિજ્ઞાપ્ય કુર્વઞ્જસા
સ્વામિન્પ્રાણગણાધિનાથ દયયા દાસં હિ માં પાલય ॥ ૧॥

ત્વય્યુત્તિષ્ઠતિ યત્કલેવરમભૂત્પાતૈકપાત્રં સુરા-
સ્ત્રાતું નૈવ હિ શેકુરાદિપુરુષોઽપ્યાસીદુપેક્ષારતઃ ।
શ્વાસાખ્યં મનુમસ્ય યત્તવ વશં બ્રૂતેઽવિગીતા શ્રુતિઃ
સત્વં પ્રાણગણાધિનાથ દયયા દાસં હિ માં પાલય ॥ ૨॥

યેનાઽઽત્મીયજિનાવનાય બલિના નીતઃ પુરોચ્ચાચલ-
સ્તીર્ણઃ પૂર્ણપયોનિધિઃ ખલહૃતા દૃષ્ટા ચ સીતાકૃતિઃ ।
તત્તે કિં કથનીયમસ્તિ જગતિ વ્યક્તસ્ય સત્પાલને
સ્વામિન્રામપદાબ્જભૃઙ્ગ તદવ શ્રીમન્હનૂમન્નમઃ ॥ ૩॥

સેવાભિઃ પરિતુષ્ટધીઃ કવિજનૈર્ગેયાભિરાદ્યઃ પુમાન્
બ્રહ્માણં કિલ ભાવિનં સમતનોત્સન્તં ભવન્તં પ્રભુઃ ।
સામ્રાજ્યે સતિ વિસ્મૃતિર્નિજજને નિન્દ્યા હિ યત્વાદૃશાં
સ્વામિન્રામપદાબ્જભૃઙ્ગ તદવ શ્રીમન્હનૂમન્નમઃ ॥ ૪॥

કામી યેન હિ કીચકો વિનિહતઃ ક્રોધી ચ દુઃશાસનઃ
સ્તબ્ધો લુબ્ધસુયોધનશ્ચ મણિમાન્મુગ્ધો મદાન્ધો બકઃ ।
કૃષ્ણેર્ષ્યાભિરતશ્ચ માગધપતિઃ ષડ્વૈરિવર્ગાત્સદા
સ ત્વં ભીમ ગુણાભિરામ દયયા દાસં હિ મામુદ્ધર ॥ ૫॥

દાહાદ્યૈન વિમોચિતો નિજજનસ્ય ત્વં ભવાગ્નેરવ
સ્વીયાધ્વપ્રતિબન્ધકશ્ચ નિહતઃ કિર્મીરનામા રણે ।
પ્રોદ્યન્મધ્વમતાધ્વગસ્ય સદય પ્રત્યર્થિનસ્સાદય
સ્વામિન્સોમકુલાગ્રગણ્ય ભવતઃ પોતં હિ માં ન ત્યજ ॥ ૬॥

વિદ્વત્સિન્ધમ(ગ્)હોદય દ્વિજપથપ્રજ્ઞપ્તિબીજોદય
પ્રત્યર્થ્યમ્બુજમુદ્રણ પ્રિયજનપ્રત્યૂહઘર્માર્દન ।
હૃલ્લગ્નામલકૃષ્ણસસ્મિતદયાવીક્ષાસુધાધિષ્ણ્ય માં
શ્રીમન્મધ્વમુનીન્દ્રચન્દ્રકુમુદસ્થાનીયમુદ્બોધય ॥ ૭॥

યદ્વાગાખ્યકરાઃ સતાં સુખકરાઃ દુર્વાદિગર્વજ્વરાઃ
સદ્વિદ્યામ્બુધિપોષકો યદુદયોઽવિદ્યામ્બુધેઃ શોષકઃ ।
યઃ શર્વેણ શિરોધૃતોઽપિ વિશદં ચક્રે મુરારેઃ પદં
સોઽવ્યાદ્દ્ભુતમધ્વતારકપતિર્હાર્દાન્ધકારચ્યુતિઃ ॥ ૮॥

પદ્યાનામિદમષ્ટકં પ્રવિલસન્મધ્વાકૃતિસ્પષ્ટકં
તદ્દાસપ્રિયવાદિરાજયતિના તદ્દત્તવાગ્ભૂતિના ।
હૃદ્યં યઃ પઠતીરિતં સુચરિતં સઃ સ્યાદ્દિશામષ્ટકે
માદ્યન્માયિમતઙ્ગભઙ્ગકરણે સિંહપ્રબર્હપ્રભઃ ॥ ૯॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
મુખ્યપ્રાણાષ્ટકં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Mrs Sornavalli

---

*MukhyaprAna Ashtakam*

pdf was typeset on May 26, 2024

Please send corrections to *sanskrit@cheerful.com*